आदेशप्रत्यययोः। (५९/२१२)

मूर्धन्यः इति वर्तते, स इति च। आदेशप्रत्यययोः इति षष्ठी भेदेन सम्बध्यते। आदेशो यः सकारः, प्रत्ययस्य च यः सकारः इण्कोरुत्तरः तस्य मूर्धन्यो भवति आदेशः। आदेशस्य तावत् – सिषेव। सुष्वाप। प्रत्ययस्य – अग्निषु। वायुषु। कर्तृषु। हर्तृषु। इन्द्रो मा वक्षत्, 'स देवान् यक्षत्' (अ. वे ३.४.६) इति व्यपदेशिवद्भावात् प्रत्ययस्य इति षत्वं भवति। [1]यजतेर्वहतेश्च [2]पञ्चमलकारे परस्मैपदप्रथमैकवचने इकारलोपः, 'लेटोऽडाटौ' (३.४.९४/३४२७) इति अट्, 'सिब्बहुलं लेटि' (३.१.३४/३४२५) इति सिप्, ततः सिद्धं यक्षत्, वक्षत् इति॥

शासिवसिघसीनां च। (६०/२४१०)

शासि वसि घसि इत्येतेषां[3] च इण्कोः उत्तरस्य सकारस्य [4]मूर्धन्यो भवति। अन्वशिषत्, अन्वशिषताम्, अन्वशिषन्। शिष्टः। शिष्टवान्। वसि – उषितः। उषितवान्। उषित्वा। घसि – जक्षतुः। जक्षुः। 'घसिभसोर्हलि च' (६.४.१००/३५५०) इति उपधालोपः। 'अक्षन् पितरोऽमीमदन्त पितरः' (वा. सं. १९.३६)। अनादेशार्थं वचनम्। घसिर्यद्यप्यादेशः, सकारस्त्वादेशो न भवति। इण्कोः इत्येव, शास्ति। वसति। जघास॥

स्तौतिण्योरेव षण्यभ्यासात्। (६१/२६२७)

स्तौतेः ण्यन्तानां च षभूते सनि परतः अभ्यासात् इणः उत्तरस्य आदेशसकारस्य मूर्धन्यादेशो भवति। तुष्टूषति। ण्यन्तानाम् – सिषेवयिषति। सिषञ्जयिषति। [5]सुष्वापयिषति। 'सिद्धे सत्यारम्भो नियमार्थः' (का. प. ६२), स्तौतिण्योः एव षणि [6]अभ्यासाद् यथा स्यात्, अन्यस्य मा भूत्। सिसिक्षति। सुसूषति[7]। एवकारकरणमिष्टतोऽवधारणार्थम्। स्तौतिण्योः षणि एव इति हि विज्ञायमाने तुष्टाव इत्यत्र न स्यात्, इह च स्यादेव सिसिक्षति इति। षणि इति किम्? अन्यत्र नियमो मा भूत्, सिषेच। को विनतेऽनुरोधः? अविनते नियमो मा भूत्, सुषुप्सति। (म. भा. ३.४४१)। [8]तिष्ठासति। कः सानुबन्धेऽनुरोधः? षशब्दमात्रे नियमो मा भूत्, [9]सुषुपिष इन्द्रम्[10]। अभ्यासात् इति किम्? अभ्यासात् [11]या प्राप्तिः तस्या नियमो यथा स्यात्, धातोः या प्राप्तिस्तस्या नियमो मा भूत्, प्रतीषिषति। अधीषिषति॥

---

1. यजतेः – वक्षत् नास्ति ब. इ. 2. पञ्चमे लकारे क. 3. लेटि इत्यधिकम् क. 4. षकार आदेशो क. 5. सुष्वापयिषति नास्ति क. 6. अभ्यासस्य क. 7. स्तौतिण्योः इति किम्? सुसूक्षते इत्यधिकम् क. 8. तिष्ठासति नास्ति ह. 9. सुषुपित इन्द्र क. ह. 10. स्वपेः लिटि अभ्यासः थासः से इति रूपम् इत्यधिकम् ब. इ. 11. यत्र प्राप्तः तत्र एव क. इ.